IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# पाणिनीयसूत्रनिर्यासः

**Dr. Hemanta Kumar Muduli**
**Lecturer (Gr.-A) in Sanskrit Vyakaran**
**Vijaananda Sanskrit College**
**Jagatsinghpur,Odisha**

**Key Words- सूत्रम्, पाणिनीयम्, संक्षिप्तीरकरणम्**

**शोधनिबन्धसारः (Abstract).**

**सूत्रमिति रहस्यं सर्वदा संक्षेपार्थेन प्रयुज्यते,स्वल्पीयसा कालेन तत्तात्पर्यं सर्वथा अवगम्यते। पाणिनीयव्याकरणे तत्सूत्रमपि सर्वथा अल्पाक्षरमसंदिग्धमिति धिया प्रबर्त्तते।अतएव तस्यैव सूत्रस्य व्युत्पत्तिगतमर्थं,तद्गतं रहस्यमवधार्य प्रबन्धोयं विकसितः। सूत्रस्यार्थनिरूपणे शास्त्रकारेषु यानि मतानि प्रतिपादितानि दृश्यन्ते,तान्यत्रोपस्थापितानि जायन्ते। यथा वायुपुराणे एतत् प्रतिपादितम्-**

**अल्पाक्षरमसन्दिग्द्धं सारवत् विश्वतोमुखम्।**
अस्तोभमअनवद्यं च सूत्रं सूत्रविदो विदुः।।[1]

एवं भावेन **महर्षिवररूचि. दुर्गासिंह-राजशेखरादिभिः शास्त्रकारैः अपि विषयेस्मिन् चर्च्चा कृता । वेदान्तशांकरभाष्ये भामतीटीकायामपि एतल्लक्षणं प्रतिपादितम् । विशेषतया पाणिनीयव्याकरणे सूत्रशब्दस्य सर्वथा एकवचनान्तत्वेप्रयोगः व्याकरणपरकमर्थं साधयति। शास्त्रकाराः एतद्विषयेऽपि सहमताः भवन्ति। तथ्यमेतत् शोधनिबन्धेस्मिन् प्रतिपादितम्।**

[1]वा.पु.49/142

# पाणिनीयसूत्रनिर्यासः

**Dr. Hemanta Kumar Muduli**

ज्ञमल ॅवतके. **सूत्रम्, पाणिनीयम्, संक्षिप्तीरकरणम्**

**सूत्र्यत इति सूत्रम्। "सूत्र वेष्टने"[2] इति ण्यन्ताद्धातोः "एरच्"[3] इति सूत्रेणाचप्रत्यये सूत्रशब्दः निष्पद्यते । तत्र इकारान्तात् धातोः अच् प्रत्ययः इति तात्पर्येण सूत्रस्तधातोः इकारान्तत्वाभावात् अचप्रत्ययः न स्यात् इति चेन्न। "भयादीनामुपसंख्यानम्"[4] कर्त्तव्यम् इति एरच् सूत्रस्तवार्त्तिकेन अच्प्रत्ययो विधीयते। पुनश्च नपुंसकक्तादिनिवृत्त्यर्थ वार्त्तीकमिदं प्रारभ्यते। एरजण्यन्तानामिति वचनसत्त्वात् ण्यन्तात् सूत्रधातोः कथम च प्रत्यय इति[5]आर्ष वचनमिदम्। [6]केषांचिन्मतेन घञ् प्रत्ययोऽपि विधीयते। एतत्तु न समीचीनं, यतो हि घञ्ण्यता पुंसि इति... विचारात् सूत्रशब्दस्य नपुंसके व्यवहारस्य अनर्थकत्तापत्तेः। [7]घञप्रत्ययान्तशब्दानां ..सर्वथा पुंलिगान्तप्रयोगः इष्यते विधीयते च। विषयेऽस्मिन् दुर्गासिंहप्रतिपादयतिसूत्र्यति वा सूत्रम्[8]। अयमर्थः लोके तत्तदर्थेषु प्रयुक्तान् शब्दान् एतादृशेन नियमरूपावेष्टनेन निबघ्नाति येन तेषु विकार मा भूत् तत् सूत्रम्। वायुपुराणे एतत् प्रतिपादितम्-**

**अल्पाक्षरमसन्दिग्द्धं सारवत् विश्वतोमुखम्।**
**अस्तोभमअनवद्यं च सूत्रं सूत्रविदो विदुः।।**[9]

**वेदान्तशांकरभाष्ये भामतीटीकायामपि एतल्लक्षणं प्रतिपादितम्-**

**लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।**
**सर्वतः सारभूतानि सूत्राण्याहु मनीषिणः।।**[10]

**महर्षि-वररूचिना सूत्रस्य लक्षणं विहितम्-**

**अल्पाक्षरमसन्दिग्धं सारवत् गुढनिर्णयम्।**
**निर्दोषं हेतुमतथ्यं सूत्रमित्युच्यते बुध्यैः।।**[11]

**सूचनाकारिग्रन्थे सूत्रशब्दस्य व्यवहारः दृश्यते। अतः अनेकार्थसंग्रहकोषे लिखितमस्ति। यत्**

**सूत्रं तु सूचनाकारिग्रन्थे [12]तन्तुव्यवस्थयोरिति।हैमेऽपि इत्यमस्ति। नागेशोऽपि मतमिदं स्वीकरोति तथाहि सूत्र[13]शब्देनाष्टाध्यायऐव तदेकदेशे तु योगव्यवहार एव ..इत्थं तस्य शब्दस्य निष्पत्तिः अर्थविचारश्च शास्त्रपरकतया अविहितो विद्यते। कालिदासेन रघुवंशे तस्य**

---

[2]चु.उ.से
[3]पा.सू.3/3/56
[4]म.भा.पृ.218 भा.2
[5]क.म.भा.पृ.218 भा.2 4.स म.भा.पद.3/3/56
[6]व्या.शा.इति.पृ.434 भा.।
[7]पा.सू.3/3/19
[8]का.वृ.दी.परिशि.409
[9]वा.पु.49/142
[10]वै.सू.1/1/1
[11]वा,सं.1/1/1
[12]अ.स.को.ऋ.472 पृ.39
[13]हैम,2/8/8

**[14]साहित्यिकोऽर्थः अभिहितः। [15]राजशेखरेण कल्पार्थ शाखा धीतमन्त्राणां विनियोजनं येन क्रियते तत् सूत्रमित्युच्यते। मैक्समूलरः एतस्य ग्रथनरूपेऽर्थे, [16]गोल्डष्टुकर एतस्य सम्पूर्णसंग्रहरूपेऽर्थे च प्रतिपादनं साधयतः।**

**विशेषतया पाणिनीयव्याकरणे सूत्रशब्दस्य सर्वथा एकवचनान्तत्वेप्रयोगः व्याकरणपरकमर्थ साधयति। शास्त्रकाराः एतद्विषयेऽपि सहमताः भवन्ति तथाहि**

1ए **सूत्रंचाप्यधीयानइष्यतेव्याकरणइति–का.वृ.१/३/७७**
2ए **सूत्राच्च कोपधात्- ४/२/६५**
3ए **पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रपोः-४/३/११°**
4ए **शोभनाखलुपाणिनेसूत्रस्यकृतिः- म.भा.२/३/६६**
5ए **व्याकरणमित्यस्य शब्दस्य कः पदार्थः सूत्रम्? म.भा. पशपशा**

**सम्पूर्णतया नियमानां संग्रहरूपेर्थे सूत्रशब्दस्य प्रयोगः व्याख्यातो विद्यते।[17]भाष्यकृता काशिकाकृता च एवमेव सिद्धान्तितः। पुनश्च सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः इति आशंका समाधाय भाष्यकृता उक्तं यस्यार्थः सूत्रं स्यात्।कैयटेन तदैव प्रतिपादितम्। तथाहि... [18] षष्ठ्यर्थ इति। द्वाभ्यामपि शब्दाभ्यां अष्टाध्याय्याः प्रतिपादनात् व्यतिरेकाभावः। सामान्यविशेषतया तु द्वे प्रयोगे न विरुध्यते।यदा तु अष्टाध्याय्यैकदेशःसूत्रशब्देन उच्यते तदा षष्ठ्यर्थोऽप्युपपद्यते। नागेशेन तदेव विचारितम् – [19]सूत्रं सामान्यः व्याकरणं विशेषः। सूत्रशब्देनअष्टाध्यायेव। तदैकदेशे तु योगे व्यवहार एव योगे योगे उपतिष्ठते। वस्तुतः एकदेशस्य सूत्रत्वेऽपि तस्यापि साक्षात् परम्परया वा व्याकरणत्वात् षष्ठ्यर्थानुपपत्तिरेवेति तत्त्वम् । पाश्चात्यविद्वासः[20]गोल्डष्टुकरमहोदयाः तदीयया भाषया तथ्यमिदं प्रकाशयन्ति यत् तर्कमार्गेण एकत्र वस्तुस्थितीनां प्रकाशनं सूत्रम् । संक्षिप्तीकरणं सूत्रमिति मैक्समूलारमहोदयाः विचारयन्ति।एवं सूत्रशब्दस्य प्रतिपादितार्थम् आशयं च विचार्य व्याकरणार्थे सार्थक्यं जातं विध्यते। तेन वर्त्मना भाष्यकारः पाणिनेः कृते सूत्रकारः शब्दस्य प्रयोगं साधुं चिन्तितवान्।"पाणिनेः सूत्रकारस्य "पुनश्च "[21]नहि पाणिनीशब्दाः प्रोक्ताः किं तीर्हि सूत्रम् "इति।**

**अवधातुंशक्यते व्याकरणे सूत्रात्मिका पराम्परा संक्षिप्तीरकरणो- उदेश्येन प्रथिता।**

---

[14]मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः-रघु.1/4
[15]नानाखाखाधीतान्तरं मन्त्राणां विनियोजकं सूत्रं कल्पः-का.मी.अ।
[16]Panini his place in Sanskrit literature-page-3
[17]म.भा./का.वृ.पा.सु.4/2/60,5/1/58
[18]म.भा.पशपशा 1/1/1
[19]म.भा.प्र.1/1/1
[20]As I belive that Panini was perfectly acquinted with the art of writing and that written books had been existed long before his time, my own opinion is that the name of book was as in the cale of PATAL &KANDA varied rather frame a national fact then from the metaphoric idea of the logical connection of rules. (Panini-his place in Sanskrit literature) by goldstucker-page 3
[21]म.भा.पदपद().वा.13

## सहायक ग्रन्थसूची


1ए महाभाष्य-भाग-1-6-राष्ट्रिय संस्कृत संस्थानम्,दिल्ली

2ए अष्टाध्यायी सूत्रपाठ-रामलालकपूरट्रष्ट,वहालगड,हरियाणा-1977

3ए काशिका भाग-1-6-जयादित्य, रत्नापब्लिकशन्य,वाराणसी।

4ए व्याकरण शास्त्र का इतिहास-युधिष्टिर मीमासाः संवत-2030

5ए रघुवंश- कालिदास, मलीनाथकृत सञ्जीविनी व्याख्या समलंङ्कृतम्, चन्दकलाहिन्दी व्याख्योपेतम्,डा कृष्णमणित्रिपाठी, चौखम्वा सुरभारती प्रकाशन-वाराणसी सं-2004

6. Panini his place in sanskrit-literature--Gold stuker-chowkhamba Sanskrit series office-1965